रौद्रश्चैत्रश्च मैत्रश्च तथा सारटकस्स्मृतः ।
सावित्रश्च जयन्तश्च गान्धर्वः कुतपस्स्मृतः ॥

रौहिणश्च विरिञ्चश्च विजयो नैरृतस्तथा ।
माहेन्द्रो वरुणश्चैव भटः पञ्चदश स्मृताः ॥
ऊर्ध्वं मुहूर्तात्कुतपात् यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकं ह्येतत् स्वधाभुवनमिष्यते ॥
आज्यं गोमयसंयुक्तं पादयोर्लेपयेद्यदि ।
पितरस्तस्य कल्पान्तममृतेनाभिषेचिताः ॥
सर्वदा दर्भपाणिस्स्यादे(द्दै)वे पित्रे(त्र्ये) च कर्मणि ।
पादशौचं गन्धलेपं न कुर्याद्दर्भपाणिना ॥
दशकृत्वः पिबेदापः गायत्र्या श्राद्धभुक् द्विजः ।
ततस्सन्ध्यामुपासीत होमं चापि यथाविधि[:] ॥
निमन्त्रितो जपेद्दोग्ध्रीं नियुक्तस्तु निषङ्गिणीम् ।
विसृष्टो वामदेवाय श्राद्धभुक् दोषवर्जितः ॥

End:

आशौचमध्ये विधुसङ्क्षये च दद्युर्दशाहे तिलवारिपिण्डम् ।
पुत्रीसुतो ओ(वौ)रसदत्तपुत्रश्शेषास्सुतास्तत्र समापयेयुः ॥

5-1-62

No. 3088. सत्क्रियाकल्पमञ्जरी.

SATKRIYĀKALPAMAÑJARĪ.

Substance, paper. Size, $8\frac{3}{4} \times 4\frac{5}{8}$ inches. Pages, 10. Lines, 40 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Vēdāntasāra 9*a*.

Also regarding obsequies.

Deals with certain funeral rites as they are to be performed in relation to Prapannas. Complete.

Beginning:

सपिण्डीकरणनिषेधपूर्वकः ।

प्रपन्नानामप्रपन्नानां वा पुत्रैः प्रपन्नैस्सपिण्डीकरणं न कर्तव्यम्; तत्स्थाने नारायणबलिरेव कर्तव्यः; विज्ञानेश्वरीयादौ सपिण्डीकरणात्प्रेतत्व-

रौहिणश्च विरिञ्चश्च विजयो नैरृतस्तथा ।
माहेन्द्रो वरुणश्चैव भटः पञ्चदश स्मृताः ॥
ऊर्ध्वं मुहूर्तात्कुतपात् यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकं ह्येतत् स्वधाभुवनमिष्यते ॥
आज्यं गोमयसंयुक्तं पादयोर्लेपयेद्यदि ।
पितरस्तस्य कल्पान्तममृतेनाभिषेचिताः ॥
सर्वदा दर्भपाणिस्स्यादे(दै)वे पित्रे(त्र्ये) च कर्मणि ।
पादशौचं गन्धलेपं न कुर्याद्दर्भपाणिना ॥
दशकृत्वः पिबेदापः गायत्र्या श्राद्धभुक् द्विजः ।
ततस्सन्ध्यामुपासीत होमं चापि यथाविधि[:] ॥
निमन्त्रितो जपेद्दोग्ध्रीं नियुक्तस्तु निषङ्गिणीम् ।
विसृष्टो वामदेवाय श्राद्धभुक् दोषवर्जितः ॥

End:

आशौचमध्ये विधुसङ्क्षये च दद्युर्दशाहे तिलवारिपिण्डम् ।
पुत्रीसुतो ओ(औ)रसदत्तपुत्रश्शेषास्सुतास्तत्र समापयेयुः ॥

No. 3088. सत्क्रियाकल्पमञ्जरी.

SATKRIYĀKALPAMAÑJARĪ.

Substance, paper. Size, $8\frac{3}{4} \times 4\frac{5}{8}$ inches. Pages, 10. Lines, 40 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Vēdāntasāra 9*a*.

Also regarding obsequies.

Deals with certain funeral rites as they are to be performed in relation to Prapannas. Complete.

Beginning:

सपिण्डीकरणनिषेधपूर्वकः ।

प्रपन्नानामप्रपन्नानां वा पुत्रैः प्रपन्नैस्सपिण्डीकरणं न कर्तव्यम्; तत्स्थाने नारायणबलिरेव कर्तव्यः; विज्ञानेश्वरीयादौ सपिण्डीकरणात्प्रेतत्व-

निवृत्तिपूर्वकवस्वादिसम्बन्धप्राप्तिरित्युक्तेः । सम्बन्धश्च क इति विशेषाकाङ्क्षायाम् ?

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः ।
प्रीणयन्ति मनुष्याणां पितुः श्राद्धेन तर्पिताः ॥

इत्यत्र विज्ञानेश्वरेण वस्वादीनां मनुष्यपित्रदि(धि)ष्ठातृत्वोक्तेः; पितॄणामाधिपत्यत्वात्(त्याच्च) श्राद्धदेवः स्मृतो रविः इति मत्स्योक्तेश्च, अधिष्ठात्रधिष्ठेयभावस्सम्बन्धः इति निश्चितत्वात् । स्वपित्रादीनां वस्वादिनियाम्यतासिद्ध्यर्थं सापिण्ड्यानुष्ठाने स्वनिष्ठाहानेर्दुर्वारत्वात् ।

End:

तानि च कर्माणि हारीतादिभिर्विशदीकृतानि भवन्ति । स्वर्गतानामित्यत्र अर्हार्थे क्तः । सर्वेषाञ्चेति पापिनामपि ग्रहणम् । वैष्णवोत्तमैरिति न तदितरव्यावृत्त्यर्थम्; अवैष्णवानामपि पूर्वोदाहृतप्रमाणैः तत्राधिकारसिद्धेः । अतः वैष्णवोत्तमैः अवश्यकर्तव्योऽयमिति आवश्यकतापरं तत् ।

यथा—

कांस्यं मांसं मसूरञ्च पुनर्भोजनमैथुनं(ने) ।
द्यूतमत्यन्नपानञ्च द्वादश्यां वैष्णवस्त्यजेत् ॥

इत्यादौ वैष्णवपदं, तद्वत् । तथा च पार्वणमर्थान्निवृत्तं भवतीति नारायणबलिमेव कुर्यादिति च फलितो भवति ।

तदेवं केवलं पिण्डसंयोजन . . पार्वणम् ।

वैष्णवव्यतिरिक्ताधिकारिकमिति सिद्धत्वात् वैष्णवैः नारायणबलिरेव कर्तव्य इति सिद्धम् ॥

Colophon:

इति सत्क्रियाकल्पमञ्जर्यां नारायणबलिविधिः ॥

तर्केभरागेन्दु (१७८६) मिते शाके भाद्रपदे सिते ।
पञ्चम्यां शुक्रवारे तु रुधिरोद्गारिवत्सरे ।।
लिखिता कृष्णरायेन(ण) सत्क्रियाकल्पमञ्जरी ।।

ग्रन्थाः १६०.

No. **3089.** सत्क्रियाकल्पमञ्जरी.

SATKRIYĀKALPAMAÑJARĪ.

Pages, 208. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2938.

Beginning:

श्रीपाञ्चरात्ररक्षायां सिद्धान्तस्थापनाधिकारे—

पूर्णोपादानं युक्तम् । अत एव हि हौत्रं होतृशाखोक्तमध्वर्यवोऽपि परिगृह्णन्ति । अतो येषु सूत्रेषु भगवदर्चनादिकं प्रत्यपादि; तन्निष्ठानामपि भगवच्छास्त्रोक्तप्रक्रियया समाराधनादिकं प्रशस्ततमम्

* * * *

मानवस्मृत्युपजीव्यभगवच्छास्त्राविरोधे तेषां बाध्यत्वमेवेति चानुगृहीतम् ।

क्षीराम्भोध्यपराजितासितमणिद्वीपस्थलीभूषणं
निष्कामैस्सुहुतानि भक्तिविवशैर्हव्यानि कव्यानि च ।
मूर्ध्ना संप्रतिगृह्य सैन्धवशिरा भूत्वा पिबन् सादरं
साक्षात्सर्वजगत्पिता स भगवान् नारायणः पातु नः ।।

साक्षाद्भगवन्तमेवोद्दिश्य परमैकान्तिभिः पित्रादिप्रत्याब्दिकश्राद्धादीन्यनुष्ठेयानि ।

श्रीमद्भगवद्गुणदर्पणे पराशरभट्टारकैः पवित्राणां पवित्रं चेत्यत्र देवतानां पावनत्वं तदुपासनार्चनपादोदकसेवादिना प्रसिद्धम् ।

End:

ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया ।
तत्सर्वं पूर्णमेवास्तु सुतृप्तो भव सर्वदा ।।

इति प्रार्थ्य पितृयागभूतबलिदानानुयागान् प्रत्यहमिव कृत्वा पुंसूक्तं वा विष्णोर्नुकमिति वा मूलमन्त्रं वा यथाशक्ति भगवन्तं ध्यायन् जपित्वा रात्रावभुक्त्वा शुचौ भूतले उदगग्रान् दर्भानास्तीर्य शयीत ।।

Colophon:

इति सत्क्रियाकल्पमञ्जर्यां नारायणबलिप्रयोगः ।।

१. स्मृत्यपेक्षया पाञ्चरात्रस्य प्रामाण्यम्.
२. वस्त्रयज्ञोपवीतप्रामाण्यम्.
३. विच्छिन्नाग्निसन्धानम्.
४. यज्ञोपवीतप्रतिष्ठा.
५. सुदर्शनादिहेतिहोमः.
६. वैष्णवलक्षणम्.
७. प्रपन्नब्रह्ममेधसंस्कारः.
८. कर्मणां नित्यनैमित्तिकत्वव्यवस्था.
९. दर्शनिर्णयः.
१०. वैष्णववैदिककर्मविधिः.
११. विश्वान् देवान् विना श्राद्धविधिः.
१२. वैष्णवबलिप्रयोजनम्.
१३. वैष्णवश्राद्धप्रयोगः.
१४. नारायणबलिविधिः.
१५. नारायणबलिप्रयोगः.

No. **3090.** सन्न्यासिसापिण्ड्यविधिः.

SANNYĀSISĀPIṆḌYAVIDHIḤ.

Pages, 8. Lines, 13 on a page.

Begins on fol. 1*a* of the MS. described under No 2974.

A work on the necessity of an ascetic's son performing the Sapiṇḍīkaraṇa ceremony in relation to the deceased Sannyāsin, his father. By Vēdāntarāmānujatātadāsa. The author says that he uses the same arguments here as were urged by Kṛṣṇasūri in his Prapannasāpiṇḍyavidhi.

Complete.

Beginning:

श्रीमत्रय्यन्तसूरीन्द्रचरणाम्बुरुहद्वयम् ।
सन्ततश्चिन्तये चिन्तितार्थकल्पकभूरुहम् ॥

प्रपन्नसापिण्ड्यविधिश्चकार श्रीकृष्णसूरिः श्रुतसर्वशास्त्रम्(ः) ।
सन्न्यासिसापिण्ड्यविधिं प्रवक्ष्ये वेदान्तरामानुजतातदासः ॥

समग्रं प्रसमीक्ष्यैतत्प्रवदन्तु मनीषिणः ।
प्रमाणशरणास्सन्तः प्रत्युत्तरमनुत्तरम् ॥
प्रपन्नश्चाप्रपन्नश्च गृहस्थश्च यतिर्द्विधा ।
प्रपन्नस्य गृहस्थस्य प्रपन्नस्य यतेस्तथा ॥
अभावात्प्रेतभावस्य प्रेतकर्म न किञ्चन ।

End:

तस्मात् श्रीकृष्णतातदेशिकचरणसिद्धान्तरीत्या स्वयम्प्रयोजनफलकसापिण्ड्यस्य नैमित्तिकतया प्रपन्नैरनुष्ठेयत्वसिद्ध्या यतिपुत्रैरपि प्रपन्नत्वेन स्वयम्प्रयोजनफलकनैमित्तिकसापिण्ड्यानुष्ठानमवश्यं कार्यमिति शिलास्थापनवदूर्जितमेवेति सुधियो विभावयन्तु ।

श्रीकृष्णतातसूरीन्द्रयुक्तिपेशलवैभवम् ।
अनुसृत्यैव शास्त्रेण यतिसापिण्ड्यमीरितम् ॥
नैवात्र भीतिरस्माकम्महद्भूतगता वयम् ।
युक्तिरेतादृशी नैव भवेदस्मादृशां क.वा ॥
युक्तिरेतादृशी न स्यात्कथं सन्न्यासिनामपि
प्रमाणशतके सत्यप्युपपन्नं सपिण्डनम् ॥
सर्वत्र धर्मशास्त्रेषु युक्तिरेतादृशी यदि ।
सर्वमप्यन्यथाकर्तुं युज्यते न प्रमाणतः ;
प्रमाणशरणानान्तु प्रमाणं नैव युज्यते ।
बलीयसी युक्तिरेव साधनं सर्वसाधने ॥

किं प्रमाणैरनेकैर्वा दाहयोग्यैरसाधनैः ।
बद्ध्वा तानि प्रमाणानि शिलया सह बुद्धिमान् ॥
अत्यगाधे महाकूपे पातयित्वाथ मौनतः ।
शास्त्रीयं वाप्यशास्त्रीयमनुतिष्ठति यो हि यत् ॥
तदनुष्ठाय गेहे तु वर्तमानस्सुखी भवेत् ।
न्यूनातिरिक्तमेतस्मिन् क्षन्तुमर्हन्ति साधवः ॥

No. 3091. सन्मार्गकण्टकोद्धारः.

SANMĀRGAKAṆṬAKŌDDHĀRAḤ.

Pages, 33. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3063.

A work on the necessity of performing the Sapiṇḍīkaraṇa ceremony in the case of a deceased Prapanna.

Complete.

By Kṛṣṇatāta.

Beginning:

रघुवरचरणद्वन्द्वध्यानसुधास्वादसक्तचित्तेन ।
श्रीकृष्णतातसुधिया क्रियते सन्मार्गकण्टकोद्धारः ॥
परोक्तेष्वर्थवर्गेषु भूयो दोषेषु कांश्चन ।
प्रधानविषयान् दोषान् विदुषामुपदर्शये ॥

यत्तावदभिहितम् प्रपन्नानामप्रपन्नानां वा पुत्रैः प्रपन्नैस्सपिण्डीकरणं न कर्तव्यम्; विज्ञानेश्वरीयादौ सपिण्डीकरणात् प्रेतत्वनिवृत्तिपूर्वकवस्वादिनियाम्यत्वसिद्धेरुक्ततया पित्रादीनां वस्वादिनियाम्यतासिद्ध्ये सापिण्ड्यानुष्ठाने स्वनिष्ठाहानेर्दुर्वारत्वादिति । तदुक्तम्—

कथमन्यथा ब्रह्मविन्मरणानन्तरं ब्रह्ममेधाद्युपक्रमात्पूर्वं भगवदाराधनतदीयाराधनादिकमुक्तग्रन्थे प्रतिपाद्यमानं केनापि नाद्री(द्रि)यते? तदेवं प्रपन्नैस्सपिण्डीकरणमेव कार्यं न तु नारायणबलिरिति सिद्धम् ।

End :

कर्माधिकृत्यै दुरितवारणाय च चोदितम् ।
प्रपन्नैस्स्वमनुष्ठेयं सापिण्ड्यं स्वप्रयोजनम् ॥
श्रीश्रीनिवासयोगीन्द्रपदाम्भोजमधुव्रतः ।
सन्मार्गकण्टकोद्धारं कृष्णतातस्समातनोत् ॥

Colophon :

इति सन्मार्गकण्टकोद्धारस्समाप्तः ॥

No. **3092.** सन्मार्गकण्टकोद्धारः.

SANMĀRGAKAṆṬAKŌDDHĀRAḤ.

Pages, 21. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 3051.

Incomplete.

Same work as the above.

No. **3093.** सन्मार्गकण्टकोद्धारखण्डनम्(मुनिभावप्रकाशिका).

SANMĀRGAKAṆṬAKŌDDHĀRAKHAṆḌANAM.

Pages, 49. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 3063

Incomplete.

A hostile criticism on the above.

Beginning :

तमालशाखोपमबाहुयुग्मं तपोधनानां हृदि सन्निविष्टम् ।
हृदम्बुजे मे रमयारमन्तं सलक्ष्मणं राघवमाश्रयेऽहम् ॥
अपरैः कण्टकोद्धारः कृतो यश्चास्य सङ्ग्रहः ।
तयोर्दोषाः प्रकाश्यन्ते यथामति सतां मुदे ॥

यदुक्तम्—वस्त्रादिनियाम्यतासिद्ध्यर्थं सापिण्ड्यानुष्ठाने निष्ठाहानिप्रसङ्गेऽपि स्वयंप्रयोजनतया तदनुष्ठानसम्भवेन सर्वथा प्रपन्नानुष्ठेयत्वरूपाभिमतासिद्धेरिति । तदयुक्तम्—स्वयम्प्रयोजनानुष्ठानसम्भवः किं स्वेच्छया उत शास्त्रेण वा ? नाद्यः ;

End :

किञ्च तयोर्वचनयोः ऐकार्थ्यवर्णनमपरेषामेव बाधकम् ; पाञ्चवचनात् । द्वादशाहानुष्ठितनारायणबलिकर्मणा मृतस्य सालोक्यप्राप्तिरित्यर्थस्वीकारावश्यकतया.

No. **3094.** सपिण्डीकरणविधिः.

SAPIṆḌĪKARAṆAVIDHIḤ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 3051.

Sapiṇḍīkarṇa is a ceremony performed on the 12th day after death. The work lays down the rules regarding the performance of that ceremony.

Complete.

Beginning :

विज्ञानेश्वरे —

"प्रेतत्वं च क्षुत्तृष्णाजनितात्यन्तदुःखानुभवावस्था" इति । तत्रैवान्यत्र —

"न च प्रकर्षगमनात्तत्रैव प्रेतशब्दप्रयोगः । यतो विशिष्टदुःखानुभवावस्था प्रेतशब्देन रूढ्याभिधीयते इत्युक्तः" इति ।

सुधीविलोचने—

"एकोत्तरवृद्धिनवश्राद्धोदकदानैर्दाहजनितक्षुत्तृष्णानिवृत्तिः, पिण्डैराकारप्राप्तिः, एकोद्दिष्टेन पिशाचत्वनिवृत्तिः, सोदकुम्भश्राद्धैः प्रेतलोकवासजनितक्षुत्तृष्णाशान्तिः, वृषोत्सर्गनवश्राद्धैः प्रेतत्वनिवृत्तिः, सपिण्डीकरणात्

पितृत्वप्राप्तिः, क्षुत्तृष्णाजनितात्यन्तदुःखानुभवावस्था प्रेतत्वम्; वस्वादिदेवतासम्बन्धः पितृत्वप्राप्तिः; अतस्तन्निवृत्तये तत्प्राप्तये च यथाकालमविळम्बेन प्रेतकार्यं कार्यम्; अन्यथा महान् दोषः" इति।

End:

पूर्वोक्तकल्पानामन्यतमानुष्ठानेऽप्यशक्तस्य कल्पान्तरमाह—अथ वा क्षीरेण पायसेन वा ब्राह्मणान् भोजयित्वेति। वाशब्दस्समुच्चयार्थः। ब्राह्मणानिति बहुवचनस्य त्र(त्रि)त्वे पर्यवसानेऽपि ब्राह्मणाधिक्ये फलविशेषादेवेति। आशिषो वाचयित्वेति सन्निधानाद्भुक्तवत्सु कुर्वन्ति यथाशक्ति दक्षिणां दत्वेति भुक्तवद्भ्यो ब्राह्मणेभ्यो दद्यात्। पूतो भवतीति संस्कर्ता पूर्वोक्तकल्पानामन्यतमानुष्ठानेनैव पूतो भवति॥

द्विरुक्तिः पटलसमाप्तिद्योतक इति॥

No. **3095.** सर्वाङ्गवपनविधिः.

SARVĀṄGAVAPANAVIDHIḤ.

ages, 4. Lines, 7 on a page.

Begins on fol. 86*a* of the MS. described under No. 2740.

Regarding a kind of ceremonial shaving of the body.

Incomplete.

Beginning:

देवा वै यद्यज्ञेऽकुर्वत। तदसुरा अकुर्वत। तेऽसुरा ऊर्ध्वं पृष्ठेभ्यो नापश्यन्। ते केशानग्रेऽवपन्त.

* * * *

इति श्रुत्या यदा यदा गृहस्थैर्वपनं कारयितव्यम्, तदा तदा श्मश्रुपक्षकेशादिसर्वाङ्गवपनं कार्यम्।

* * * *

तथा श्रीधरीये—

मृताहे केशवपनं दशाहे शेषवापनम्।
अशोभनमनायुष्यं मृताहे शेषवापनम्॥

इति। अत्र शुद्धिनिर्णयकार इति केचिदनभिज्ञाः दशाहेऽशेषवापनमिति पदच्छेदं कृत्वा सर्वाङ्गक्षौरं दशमदिने वदन्ति.

End:

केशश्मश्रु वपते, नखानि निकृन्तते, स्नाति, अहतं वासः परिधत्ते—इति.

No. **3096.** सहगमनश्राद्धम्.

SAHAGAMANAŚRĀDDHAM.

Pages, 5. Lines, 8 on a page.

Begins on fol 57*a* of the MS. described under No. 2902.

Regarding the performance of the Śrāddha ceremony of one who has committed Satī

Complete.

Beginning:

भर्त्रा सहैव या भार्या एकचित्त्यां समाचरेत्।
तच्छ्राद्धमेककालं स्यादेको देवं(वो) हुतं ततः॥
अनुयाने पति(ते)र्यन्नो पृथक् पिण्डं तिलाञ्जलिम्।

* * * *

पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियं(याः)॥

End:

तथा न प्रविशेद्वह्निं ब्राह्मणी स्यान्मनु(नू)क्तितः।
ब(ला)द्वा प्रेरिताद्वापि बलवत्या रुषा तथा॥
रजस्वला च गर्भिण्या (गर्भिणी च) न विशेच्च हुताशनम्।

वसिष्ठः—

पत्युश्चित्यां समारुह्य या नारी ज्वलनं गता ।
तस्याः पिण्डं तु तत्पुत्रः स्वस्रादिषु नियोजयेत् ॥

No. 3097. सापिण्ड्यविषयः.

SĀPINḌYAVIṢAYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 3059.
Regarding the ceremony of Sapinḍīkaraṇa.
Incomplete.

Beginning:

सुधीविलोचने—

यस्य दशाहानन्तरं दर्शे पिण्डपितृयज्ञः प्राप्तः, तस्य द्वादशाहे कार्यम्; यस्य वा मासि दुष्टे पुंसवनादि प्राप्तं, तदर्थं मासदोषेऽपि सापिण्ड्यं कार्यम्; तदकरणे पितृत्वमप्राप्तस्याभ्युदयश्राद्धोद्देश्यत्वानुपपत्तेः ।

End:

तत्रैव—

किमर्थं मृतस्य पिण्डोदकश्राद्धादिकरणम्? मरणानन्तरमेव स्वकर्मार्जितगतिप्राप्तेरित्यत्राह.

No. 3098. स्मृतिवचनानि (श्राद्धविषयाणि).

SMṚTIVACANĀNI (REGARDING ŚRĀDDHA).

Pages, 6. Lines, 7 on a page.

Begins on fol. 33*a* of the MS. described under No. 1165.
Extracts from Smṛtis relating to the Śrāddha ceremony.
Incomplete.

Beginning:

अथ यद्यौपासनं नश्येत्; कथं स्यादिति?

लौकिकमग्निमाहृत्य आज्य(ज्येन)संस्कृत्य उपसमाधाय नाशान्तयोश्चतुर्गृहीतं स्यात् . . . .

द्वादशाहे तु संप्राप्ते शुक्रवारो भवेद्यदि ।
मातापित्रोर्विनान्येषां सपिण्डीकरणं न तु ॥

एकादशेऽह्नि संप्राप्ते शुक्रवारो भवेद्यदि ।
मातापित्रोर्न दोषस्स्यादन्येषां न कदाचन ॥

End:

पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी मता ॥
पितृकर्मसु सर्वेषु श्रेष्ठा यत्रापराह्णिका(की) ।
सस्नात(द)नोपवासेषु स्याद्विंशद्घटिकात्परम् ॥
व्रतारम्भसमाप्तौ तु सायङ्कालगता तदा ।
प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रतेषु च ॥
सजागरोपवासेषु अर्धरात्रगता भवेत् ।
गौरीपूजां(जा) तृतीयां(या) च नवमी माघसप्तमी ॥
चतुर्दश्यष्टमी चैव सदा एकादशी तिथिः ।
उदयात्परतरं चैव मुहूर्तमपि संयुतम्(ता) ॥
निरूढस्य च यस्याग्निः यः परिस्तृतिमध्यतः ।
अनिरूढस्स वै वह्निः यः परिस्तरणाद्बहिः ॥

III. DIGESTS (SPECIAL).
(5) KĀLANIRṆAYA.

The works mentioned in this sub-division deal with the determination of the exact time when various prescribed rites and ceremonies are to be carried out.

No. 3099. अर्धोदयः.
ARDHŌDAYAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 73*b* of the MS. described under No. 2840.

Ardhōdaya is a day of great religious importance occurring at rare intervals in the month of Puṣya or Māgha. It is a new-moon-day coinciding with Sunday, Śravaṇa and Vyatīpātayōga.

Complete.

Beginning:

अमार्कपाद(त)श्रवणैर्युक्ता चेत्पुष्यमाघयोः ।
असावर्धोदयो योगः सहस्रार्कग्रहोपमः ॥
मण्डलं कारयेत्तत्र पद्ममष्टदलं लिखेत् ।
अक्षतैश्चन्दनैः पुष्पैः रक्तवस्त्रैश्च पूजयेत् ॥

End:

सङ्क्रान्त्यां यानि दा(ना)नि हव्यकव्यानि यानि च ।
सप्तकल्पक्षयक्षीणे दद्यादर्कः पुनः पुनः ॥

Colophon:

इति पद्मपुराणे अर्धोदयविधिः (समाप्तः) ॥

No 3100. उपाकर्मनिर्णयः.
UPĀKARMANIRṆAYAḤ.

Pages, 15. Lines, 8 on a page.

Begins on fol. 54*a* of the MS. described under No. 211.

Upākarma is a ceremony performed on the occasion of commencing the study of the Vēdas. This work determines the proper time for performing that ceremony.

Complete.

Beginning:

उपनयनानन्तरं क्रमप्राप्तानां श्रावण्यां पौर्णमास्यामुपाकर्म कर्तव्यम्; ब्रह्मयज्ञवन्नित्यत्वात् । उपनयनात्परेद्युर्माध्याह्निकसन्ध्यानन्तरमाश्वलायनानां माध्याह्निकसन्ध्या(नन्तरं) यथा ब्रह्मयज्ञोपक्रमः उपाकरणपर्यन्तं गायत्र्या ब्रह्मयज्ञकमिति; तथा प्रथमश्रावणपौर्णमास्यामिव उपाकर्मोपक्रमः कर्तव्यः ।

* * * *

मौढ्यादिदोषो ग्रहणं यदि स्याद्दोषाद्यभावो यदि कर्कटस्थः ।
भानुर्द्विजाः श्रावणकर्म कुर्युर्न त्याज्यमाहुर्मुनयो मनीषिणः ॥
नूतनो वटुसंस्कारः कुलीरे शङ्कया यदि ।
उपाकर्म न कुर्वीत संस्कारो विधिवत्पुनः ॥
श्रावणे मासि भाद्रे वा गुरुभार्गवमूढयोः ।
तदाषाढ्यां तु कर्तव्यमृग्यजुस्सामवेदिनाम् ॥

गर्गः—

अर्धरात्रादधस्ताच्चेत्सङ्क्रान्तिर्ग्रहणं यदि ।
उपाकर्म न कर्तव्यं परस्ताच्चेन्न दोषभाक् ॥

अथोपाकर्म ।

तत्राश्वलायनः—

अथातोऽध्यायोपाकरणमोषधीनां प्रादुर्भावे च श्रवणे श्रावणस्य पञ्चम्यां हस्तेन वेति । अधीयत इत्यध्यायो वेदः तस्योपाकरणं प्रारम्भः । तद्वक्ष्यत इति शेषः । उपाकरणाख्यं कर्म कृत्वा वेदाध्ययनमारभेतेत्यर्थः ।

End:

आश्वलायनगृह्यकारिकाकारः—
अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते ।
ग्रामाद्बहिर्विविक्ते स्यादुपलेपादि पूर्ववत् ॥

Colophon:

इति स्मृतिरत्नाकरे उपाकर्मप्रकरणं समाप्तम् ॥

No. **3101.** उपाकरणविचारः.

UPĀKARAṆAVICĀRAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 21*a* of the MS. described under No. 3029.

Deals with the same subject as the above work.

Incomplete.

Beginning:

शुक्रे मूढेऽप्युपाकृत्य(।) विद्यावित्तविनाशिनी ।
आयुःक्षयमवाप्नोति तस्मात्तत्कर्म वर्जयेत् ॥
मलमासा(से)निपतिते सूतके मृतकेऽपि वा ।
ग्रहणे सङ्क्रमे वापि मौढ्येऽपि गुरुशुक्रयोः ॥
उपाकर्म न कुर्वीत कुर्याच्चेत्स विनश्यति ।

End:

तदा(था)धिमाससंसर्गे मलमासादिषु द्विजैः ।
प्रथमोपाकृतिर्न स्यात् कृतं कर्म विनाशकृत् ॥

No. **3102.** एकादशीनिर्णयः.

ĒKĀDAŚĪNIRṆAYAḤ.

Substance, paper. Size, 8⅝ × 6⅝ inches. Page, 1. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 23*a*. The other works herein are, Bhārgavasūtram 1*a*, Jyautiṣaviṣaya with Telugu notes 23*a*.

Deals with how the fortnightly day of fasting, which is generally the eleventh day in both the fortnights in the lunar month, is actually to be determined from time to time.

Beginning:

दशमी पञ्चघटिकाः षट्पञ्चैकादशी तथा ।
षष्ठी च द्वादशी चैव सर्वत्र अ(ह्य)तिरिक्तता ॥
अरुणोदयवेलायां दशमी यदि दृश्यते ।
संप्रत्ये(पृक्तै)कादशी तत्र वर्जयेत्तां विचक्षणः ॥

End:

तिथ्याद्यन्तघटीमानं तिथिघं(घ्नं) षष्टिभाजितम् ।
लब्धं हरिदिनैर्यत्र शेषस्तु हरिवासरः ॥

No. **3103.** एकादशीनिर्णयः.

ĒKĀDAŚĪNIRṆAYAḤ.

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 1. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 18*b*. The other works herein are, Jyautiṣaviṣayaḥ 1*a*, Bhārgavasūtram 19*a*.

Same work as the above.

No. **3104.** एकादशीनिर्णयः.

ĒKĀDAŚĪNIRṆAYAḤ.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 182. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Similar in character to the above.

Beginning:

यदैकादश्यां वाक्यसिद्धान्ताख्यगणितभेदेन वेधावेधौ सर्वगणितेऽपि द्वादश्याधिक्यं किं तदा निष्कामैः कर्तव्यम् । अत्र मान्याः—
शुद्धा विद्धा वा द्वादश्याधिक्ये सर्वैर्द्वादश्येवोपोष्या ।

तथा नारदः—

न चेदेकादशी विष्णौ द्वादशी परतः स्थिता ।

उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम् ॥

इति वदन्त्यत्र केचित्—एकादशी शुद्धद्वादशी च सम्पूर्णे सती(त्यौ)त्रयोदश्यां वर्त(र्ते)ते ; तदेकादश्येवोपोष्योदाहृतनारदवचन उपोष्या एकादशीति पाठस्य माधवहेमाद्रिनिर्णयसिन्धुसमयप्रकाशिकाग्रन्थेषूपलब्धेः, भवल्लिखितपाठस्यानुपलब्धेः । किञ्च शुद्धा विद्धेत्येव तैर्लिखितम् । तत्रैकादशीति पूरणीयम् । अन्यथा ग्रन्थासङ्गतेरर्थासङ्गतेश्च । एवं स्थिते वचनमन्यथा लिखित्वा शास्त्रार्थमन्यथा कथयत्सु पण्डितंमन्येषु तत्प्रणीतपुस्तकेषु वा कथं विश्वसन्तीति वदन्ति ।

End :

न्यायं व्युत्पाद्य नानार्थत्वं न्यायान्तरत्वेनैवाभ्यदधुरिति स्यात् ; तदा को दोषः ? उदाहरणान्तरे न्यायसङ्करो भविष्यति । एकस्मिन् तृचे बृहद्रथन्तरयोर्विधौ तयोरन्यतरप्रतिषेधेनान्यतरविधौ अन्यतरस्मिन् प्राकरणिकेऽन्यतरस्य वचनाद्वाभिधाने तयोरेव साम्नोस्तथाभूतसामान्तरे तत्तद्धर्माणां वैकल्पिकवेदार्थान्तरेषु तत्तद्धर्माणां वा व्यवस्थाया एतन्न्यायाधीनत्वात् । अत एव तन्त्ररत्नेऽपि भाष्यस्यायमर्थः—निर्देशसामर्थ्यात् केषुचिद्धर्मेषु बृहन्निर्दिश्यते । केषु.

No. **3105.** एकादशीनिर्णयः.

ĒKĀDAŚĪNIRṆAYAḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 8. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, new.

Deals with the eleventh day of fast in each lunar fortnight. Complete.

Begins on fol. 72*b*. The other works herein are :—

	Fol.		Fol.
Anantavratakathā ..	1*a*	Sāvitrīvratam	40*a*
Daśāphalavratakalpaḥ ..	7*b*	Vaṭasāvitrīvratōdyāpanam	45*b*
Lakṣavartīvratam ..	8*b*	Kadalīvratam	47*b*
Lakṣatulasyudyāpanam ..	9*b*	Kadalīvratōdyāpanam ..	50*b*
Lakṣapradakṣiṇavratakalpaḥ	10*a*	Svastikāvratam	51*b*
Ṛṣipañcamyarcanā ..	12*a*	Anantavratamāhātmyam	54*b*
Ṛṣipañcamīvratakalpaḥ	13*a*	Kārtikaśuklavaikuṇṭhacaturdaśī	5*a*
Ṛṣipañcamīvratōdyāpanam	16*a*	Śivarātrivratam	55*b*
Kēdāravratakalpaḥ ..	26*a*	Yēkādasīnirṇayaḥ ..	72*b*
Sōmavatyamāvāsyāvrata	32*a*	Yēkādaśīvratōdyāpanam	76*b*
Saṅkrāntivratadīpōdyāpanam	37*a*	Yēkādaśīvratakathā ..	78*b*
Pūrnimāmāvāsyāvratam ..	37*b*	Anantavratōdyāpanam ..	83*a*
Sāvitrīpūjāvidhiḥ ..	38*a*	Yamunāpūjā	88*a*

Beginning :

अथैकादशीव्रतानि । तत्र उपवास एकादशीनिर्णयः—सा च द्विविधा—शुद्धा दशमीविद्धा च । वेधोऽपि द्विविधः—अरुणोदये दशमीसंबन्धात्सूर्योदये वा । तत्राद्यो वैष्णवा(वै)स्त्याज्यः । अ(त)था च भविष्ये—

अरुणोदयकाले तु दशमी यदि दृश्यते ।

सा विद्धैकादशी तत्र पापमूलमुपोषणम् ॥ तथा—

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।

नैवोपोष्यं वैष्णवेन तद्दि(द्धि)नैकादशीव्रतम् ॥

End :

अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा ।

एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत् ॥

Colophon :

इत्येकादशीनिर्णयः ॥

No. 3106. कालनिर्णयचन्द्रिका.

KĀLANIRṆAYACANDRIKĀ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 400. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Breaks off in Āgrayaṇakāla.

Incomplete.

A work by Sītārāmacandra on the determination of certain ritualistically important days, etc

Beginning :

यन्निर्धारणभीरवश्श्रुतिशिरस्सङ्घा अभूवन् जग-
ज्जन्मस्थानविरामकारणमभूद्यत्स्वप्रकाशं परम् ।
यत् सत्त्वान्तसरोरुहोदरचरद्भृङ्गायमानं(णं)हि य(त)त्
वन्दे शान्तमचिन्त्यवैभवमहं रामाभिधानं महः ॥

प्रत्यूहाम्बुधयः प्रयान्ति सततं यन्नामसंकीर्तनात्
शोषं यद्द्विपुरानने नृगजतामाधत्त तस्मै नमः ।

यद्ब्रह्माद्यमरैरुपास्यमखिलैश्चाशेषजीवात्मना-
म्भोजाटं कवितानिदानमनिशं सारस्वतं यन्महः ॥

श्रीमत्कौण्डिन्यगोत्रे प्रथितपृथुयशा मिट्टपल्यन्ववाये
सञ्जातः पेद्दिभट्टो हरिपदकमलाराधनैकाग्रचित्तः ।
जातस्तस्मान्नृसिंहो निखिलगुणगणख्यातकीर्तिस्सुविद्वान्
श्रीधर्माभट्टनामा सकलमुनिकृतग्रन्थसामर्थ्यकेषु(रामृताशी) ॥

विद्वान् सर्वागमज्ञो विरचितहरितुष्ट्यर्पिताचारवीरः
श्रौतस्मार्तैकनिष्ठस्सकलनिगमवाक्योदितार्थावबोधः ।
तस्मात् कामक्कनाम्नीजठरजलनिधौ वृद्धि(वर्द्धि)तोऽहं सुधीमान्
श्रीसीतारामचन्द्रः स्मृतिनिगमपुरा[ण]न्यायवेत्ता सुविद्वान् ॥

निखिलग्रन्थसन्दोहमालोड्याहं प्रयत्नतः ।
ततस्सारं समुद्धृत्य हृदये तं निधाय च ॥
कालनिर्णयसन्देहतमस्सन्दोहपाटिनीम् ।
श्रुतिमार्गानुगां कुर्वे कालनिर्णयचन्द्रिकाम् ॥

* * * *

श्रुतिः—

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः ॥
अर्धमासा मासा ऋतवस्संवत्सरश्च कल्पन्ताम्—इति ।
अस्यायमर्थः.

End :

भोजने पतितान्नस्य चरुर्वैश्वानरो भवेदिति । नित्ययज्ञ औपासन-होमः, व्रीह्यादिनवीनद्रव्यसाध्यो यज्ञो नवयज्ञः । आग्रयणमिति यावत् ।

कारिकाकारोऽपि—

अकृताग्रयणोऽश्नीयात् नवान्नं यदि वै नरः ।
वैश्वानराय कर्तव्यः चरुः पूर्णाहुतिस्तु वै ॥

गृह्यप्रायश्चित्ते त्वन्यथा प्रायश्चित्तमुक्तम्.

No. 3107. कालमयूखः.

KĀLAMAYŪKHAḤ.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{2}$ inches. Pages, 147. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Karmavipāka 66*a*.

Breaks off in Kalivarjyaniṣēdha.

A portion of Bhagavanta-Bhāskara by Nīlakaṇṭhabhaṭṭa, son of Bhaṭṭa Śaṅkara and grandson of Bhaṭṭa Nārāyaṇa. The original takes its name from King Bhagavantadēva of the Rajput

tribe of Saṅgaras, under whose auspices the work was compiled. The name means "the sun Bhagavanta." The work is divided into 12 Mayūkhas (rays)—(1) Saṁskāra, (2) Ācāra, (3) Samaya, (4) Śrāddha, (5) Nīti, (6) Vyavahāra, (7) Dāna, (8) Utsarga (9) Pratiṣṭhā, (10) Prāyaścitta, (11) Śuddhi, (12) Śānti. The approximate date of the work is said to be 1640. A.D.

Incomplete.

Beginning :

यो लीलया संतनुतेऽत्र विश्वं तत्रा(त्पा)लयत्स्वात्मनि विश्वरूपं(पे) ।
लयं व(न)यत्याशु च पूर्णरूपं शिवं तनोत्वाशु रविर्ममासौ ॥
श्रुतिस्मृती वीक्ष्य पुराणजातं तत्तन्निबन्धानपि सन्निबन्धान् ।
श्रीशङ्कल(र)स्यात्मजनीलकण्ठः तिथ्यादिकृत्यं विवृणोति सर्वम् ॥
तिथिर्द्विधा पूर्णा खण्डा च । तत्राद्या स्कान्दे—
प्रतिपत्प्रभृतयस्सर्वा उदयादुदयं रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिताः ॥

End:

मदनपारिजाते निगमः—
अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥ इति ।

यथा—वेदिबर्हिर्धर्माणां प्रधानसम्बन्धमात्रांशे विधिर्न तु तादर्थ्यांशे; प्रमाणाभावात् । श्राद्धे मांसमित्यत्र श्राद्धसंबन्धिक्रत्वर्थं पुरुषार्थं च निषिध्यते; अविशेषात्पञ्चेत्यत्र परिसङ्ख्यादोषत्रयापत्तेः; पूर्वोक्तानेकवाक्यानर्थक्यापत्तेश्च । अतः प्रदर्शनसूत्रार्थम्.

No. 3108. कालमयूखः.
KĀLAMAYŪKHAḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 166. Lines, 8 on a page. Character, Grantha. Condition, very much injured. Appearance, new.

Incomplete.

Breaks off in Vaiśākhakṛtya.

Same work as the above.

No. 3109. कालमाधवीयम्.
KĀLAMĀDHAVĪYAM.

Pages, 230. Lines, 15 on a page.

Begins on fol. 164*a* of the MS. described under No. 2655.

The Kāla portion is complete.

A work similar in character to the above: by the well known Mādhavāchārya of Vidyānagara.

Beginning :

वागीशाद्याः . . . . . गजाननम् ॥
सोऽहं . . . . अव्याहतम् ॥
सत्यैकव्रतपालको द्विगुणधीः ऽर्थी चतुर्वेदिता
पञ्चस्कन्धकृती षडन्वयदृढस्सप्ताङ्गसर्वंसहः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्ययः
स्मार्तोच्छ्रायधुरन्धरो विजयते श्रीबुक्कणक्ष्मापतिः ॥
व्याख्याय माधवाचार्यो धर्मान्पाराशरानथ ।
तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥
व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं
विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदयानाम् ।
सर्वेषां तत् परमसुखदं भारतीतीर्थमाहुः
तद्भावान्मे विमलमनसो निर्णये शक्तिरस्ति ॥
अर्थोऽनुक्रम्यते श्लोकैरखिलो निर्णिनीषितः ।
तावतैवानुतिष्ठासुः निस्सन्देहः प्रवर्तताम् ॥

ततो मीमांसचित्तस्य समाधानाय तत् पुनः ।
विवदिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात् ॥
पञ्चप्रकरणान्यत्र तेषूपोद्घातवत्सरौ ।
प्रतिपच्छिष्टतिथयो नक्षत्रादिरिति क्रमः ॥
उपोद्घाते कालसत्त्वं तस्य निर्णययोग्यता ।
ईश्वरो नित्यकालात्मा चिन्तनीयस्स कर्मसु ॥

* * * *

तमेव निर्णयं शास्त्रं(स्त्र)न्यायाभ्यां वक्तुमुद्यतः ।

Colophon:

इति कारिकास्समाप्ताः ॥

ननु नायमुद्यमस्सफलः; कालस्य गगनकुसुमायमानत्वात् । तदेतत्परमरहस्यमभिजानन् कपिलमहामुनिः तत्त्वानि निर्वक्तुकामः कालमुपेक्ष्यामून्येव पञ्चविंशतितत्त्वानि विवेच—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त ।
षोडशकस्तु विकारः न प्रकृतिर्न विकृतिः पुरुषः ॥ इति ।

End:

अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितस्स्नात्वा सर्वपापैः प्रमुच्यते ॥

पुत्री तु नोपवसेत् । तदाह नारदः—

संक्रान्त्यामुपवासञ्च कृष्णैकादशि(श)वासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात् पुत्रवान् गृही ॥ इति ।

ग्रस्तास्तमये तु पुत्रिणोऽप्युपवास एव, अहोरात्रं न भोक्तव्यमिति भोजनप्रतिषेधात् ॥

Colophon:

इति श्रीमाधवीये कालनिर्णये ग्रहणनिर्णयस्समाप्तः ॥

No. 3110. कालमाधवीयम्.

KĀLAMĀDHAVĪYAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 34. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 21*a*. The other work herein is, Kāladarśaḥ fol. 1*a*.

Incomplete.

Same work as the above.

No. 3111. कालमाधवीयम्.

KĀLAMĀDHAVĪYAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 248. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

To the end of Grahaṇādhikāra.

Same work as the above.

No. 3112. कालमाधवीयम्.

KĀLAMĀDHAVĪYAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 203. Lines, 7 on a page. Character, Nandināgarī. Condition, good Appearance, new.

Up to Śāntinirṇaya.

Same work as the above.

No. 3113. कालमाधवीयम्.

KĀLAMĀDHAVĪYAM.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{4}$ inches. Pages, 288. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 6*a*. The other work herein is, Hēmādriprāyaścitta 1*a*.

Same work as the above.

No. 3114. कालादर्शः.
KĀLĀDARŚAḤ

Pages, 40. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3110.

Complete.

A work similar in character to the above: By Adityabhattōpādhyāya. Wants beginning.

Beginning:

उपवासैकवित्तानि कुर्यात् प्रातश्च पारणम् ।
पूर्वतिथ्या सुविद्धासु तिथ्यन्ते पारणं विदुः ॥
मध्यंदिनयुतायान्तु भवेत् सर्वमुपोषणम् ।
त्रिमुहूर्तास्तम[ ]नात् प्राक् परतश्च यथाविधि ॥
यस्यां नक्तव्रतं कुर्यात् हरिनक्तव्रतादृते ।
पूर्वेऽह्नचेव प्रदोषासौ पूर्वा पूर्वापराह्णयोः ॥

End.

ज्यो(ज्यौ)तिषाणि च शास्त्राणि वास्तुतन्त्रं समीक्ष्य च ।
न्यायैस्सम्यग्विचार्यायं कालादर्शो मया कृतः ॥
अत्रत्यवचनानां ये मूलं पृच्छन्ति पण्डिताः ।
तेषा[ ]पेक्ष्या इमे ग्रन्था इति दत्तं मयोत्तरम् ॥

Colophon:

इति (आदित्य)भट्टोपाध्यायस्य कविक्ल्सभापरनाम्नः गर्गकुलतिलकस्य कृतिषु कालादर्शो नाम कालनिर्णयस्समाप्तः ॥

No. 3115. कालादर्शः—सव्याख्यः.
KĀLĀDARŚAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 290. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as the above with a commentary.

Copying is said to have been completed by Purāṇam Padmanābhuḍu on Thursday of Kārtika Bahula in the year Kīlaka.

Beginning:

ब्रह्मादयो यद्वशगा युगादिकालप्रभेदाश्च यदीयभेदाः ।
कालाय कंसान्तकमूर्तयेऽहं नित्याय तस्मै प्रभवे नतोऽस्मि ॥
वाणीगणेशावमरेन्द्रमौलिमाणिक्यनीराजितपादपद्मा(द्मौ) ।
अविघ्नमाविष्कृतविश्वलोकमनोरथाह(व)न्वहमानमामि ॥
विश्वेश्वराचार्यपदारविन्दप्रणामविस्तारितवाग्विलासः ।
आदित्यसूरिस्स्मृत(ति)तत्त्वदर्शी कालं विनेष्यत्यपि (विनिर्णेष्यति) मन्दबुद्ध्यै ॥

ननु स कालः को(को)पयुज्यते? यो निर्णीयत इत्यत्राह—

कालो विधिबलाद्दर्शपूर्णमासादिकर्मसु ।
अङ्गत्वेनेष्यते तस्मादसौ निर्णीयते मया ॥

सिद्धान्तावच्छेदनायाह—

प्रामाण्यं स्मृतिपुराणानामप्रामाण्यं सिद्धान्तिं(न्ते) चोदना च विधिवाक्यम् । विधिश्च द्विविधः प्रवर्तको निवर्तकश्च । प्रवर्तको यथा—अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति ।

दर्शे स्नात्वा पितृभ्यस्तु दद्यात्कृष्णतिलोदके ।
अन्नं च विधिवद्दद्यात्सन्ततिस्तेन वर्धते ॥ इति ।

End:

तदुक्तं वृद्धगार्ग्येण—

अग्निहोत्र(त्रं) दर्शपूर्णमासावप्युत्तरायणे ।
उपक्रम्य यथाकालमुपासीत द्विजातयः ॥
सोमश्च पशुबन्धश्च सर्वाश्च विकृतीर(त): ।
[सौम्या]

(दृष्ट्वा पुरातनपुराणवचांस्य)शेष-
मन्वादिकस्मृतिवचांसि विविच्य तत्व(कर्तु)म् ।

संवत्सरागमवचांसि स कालतत्त्वं
निर्णीयते स्तस्मृ(सुकृ)तिना कविवल्लभेन ॥

इति यज्ञकालनिर्णयप्रकरणम् ॥

Colophon:

आदित्यभट्टोपाध्यायकविवल्लभापरनाम्नो गर्गकुलतिलकस्य कृतिः कालादर्शो नाम कालनिर्णयस्समाप्तः ॥

भो(ः) कोविदाः कृतधियः कविवल्लभस्य
विज्ञापनां शृणुत वो रचितप्रमाणं(तः प्रणामः) ।

कालस्य निर्णयकरीं स्मृतिमस्मदीया-
मेनां निरस्तमदमत्सरमाद्रियध्वम् ॥

विज्ञानयोगिनो विश्व(रूपा)चार्यस्य निश्चयः(म्) ।
गृह्यस्य(स्व)धर्मयोर्भाष्यं तथा स्मृतिमहार्णवम् ॥

विश्वादर्शं नित्यदर्शं धवलं स्मृतिचन्द्रिकाम् ।
अपरार्कं कल्पतरुं शिवस्वामिमतं तथा ॥

जा(बा)लहु(रू)पं स्मृतिं(रत्न)मञ्जूषां भानवं मतम् ।
स्मृतिसङ्ग्रहं(हणं) धर्मप्रदीपं कारणागमम् ॥

ज्यो(ज्यौ)तिषाणि च सर्वाणि वास्तुतत्त्वं समीक्ष्य च ।
न्यायैस्सम्यग्विचार्योयं(र्यायं) कालादर्शो थमाग(मया कृ)तः ॥

अत्यत्र(त्रत्य) वचनानां ये मूलं पृच्छन्ति पण्डिताः ।
तेषां प्रेक्ष्या इमे ग्रन्था इति दत्तं मयोत्तरम् ॥

No. 3116. ग्रहणनिर्णयः.
GRAHANANIRṆAYAḤ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 14*a* of the MS. described under No. 928.

A work on the determination of the exact time when certain ceremonies connected with solar and lunar eclipses are to be performed.

Incomplete.

Beginning:

तत्र वृद्धगार्ग्यः—

पूर्णिमाप्रतिपत्सन्धौ राहोः केतु(केतोश्च)मण्डलम् ।
ग्रसते चन्द्रमर्कं च दर्शप्रतिपदन्तरा ॥

इति । दर्शप्रतिपदन्तरा दर्शप्रतिपदोर्मध्ये । तत्र कालविभागो ब्रह्मसिद्धान्ते दर्शितः—

यावान् कालः पर्वणोऽन्ते तवन्(तावान्) प्रतिपदादिमः ।
रवीन्दुग्रहणेनेह न (सु)पुण्यो मिश्रगाद्भवे(त्) ॥

कालः पर्वणोऽन्तिमो भागः स्पर्शकालः, प्रतिपद आदिमो भागः मोक्षकाल इति विभागः ।

स्मृत्यन्तरेऽपि—

अमाप्रतिपदोस्सन्धौ सूर्यस्य ग्रहणं भवेत् ।
प्रतिपत्पौर्णमास्योश्च सन्धौ स्याद्ग्रहणं विधोः ॥ इति ।

* * * *

भास्कर इत्युपलक्षणम्; यदा चन्द्रस्य ग्रस्तास्तमयः, तदा तस्मिन्नहनि मुक्तिं विज्ञाय स्नात्वा श्राद्धं कुर्यात् ॥

Colophon:

कर्मप्रदीपिकायामुपरागविधिस्समाप्तः ॥

End:

उपरागोपद्रवादि दैविकं राजिकं विना ।
न कार्यमिति तत्रोक्तैस्संवर्तः प्राह निर्णय(म्) ॥

पतिपुत्रविहीनाया(ः) कर्तास्तु ग्रहणे दिने ।
उपवासविधानाच्च द्वितीयेऽह्नि मृ(ता)हकम् ॥

No. **3117.** जयन्तीनिर्णयः.

JAYANTĪNIRṆAYAḤ.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 171. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

A work by Gōpāladēśika on fixing the anniversary of the birthday of Śrīkṛṣṇa to be observed as a day of special religious importance.

Begins on fol. 1*a*. The other works herein are—Śravaṇadvādaśīnirṇayaḥ 87*a*, Nṛsimhajayantīnirṇayaḥ 98*a*, Śrīrāmanavamīnirṇayaḥ 100*a*, Dēśikasahasranāmastōtram 102*a*.

Beginning:

वन्दे पुमांसं परमं जयन्त्यामाविर्भवन्तं मुरलीधरन्तम् ।
गोपालमस्मद्गुरुमौलिभूषापादाम्बुजद्वन्द्वमनन्तरूपम् ॥

रङ्गरामानुजमुनिमुखैः प्राक्तनदेशिकैः ।
निर्णीता श्रीजयन्तीयं सन्मार्गेण सतां मुदे ॥

तथापि तत्र सासूयैर्हैतुकैस्तत्र तत्र च ।
साधितन्त्वन्यथाभावं निराकर्तुमिहोद्यमः ॥

तत्र तावत् जन्माष्टमी जयन्ती चेति 'द्विविधं व्रतदिनम् । तत्र जन्माष्टमीजयन्त्योः लक्षणमुक्तं नारदीयसंहितायाम्—

जन्माष्टमी जयन्ती च द्विविधा परिकीर्तिता ।
कृष्णपक्षेऽष्टमीपूर्णा श्रावणे रोहिणीयुता ॥
जन्माष्टमी सा विज्ञेया उपोष्या कृष्णतुष्टिदा ।
श्रावणे मासि संप्राप्ते कृष्णपक्षेऽष्टमीयुता ।
सम्पूर्णा रोहिणीयुक्ता सा जयन्तीति कथ्यते ॥

End:

परेद्युः पारणाशास्त्रस्यैवादर्तव्यत्वाच्चेति समञ्जसम् ॥

इति श्रीमदात्रेयकृष्णार्यतनूजस्य तच्चरणकमलचञ्चरीकस्य श्रीमद्वेदान्तरामानुजयोगीन्द्रमहादेशिककटाक्षलब्धवेदान्तरहस्यजालस्य श्रीगोपालदेशिकस्य कृतिषु श्रीजयन्तीनिर्णयस्सम्पूर्णः ॥

श्रीमत्कस्तूरिरङ्गार्यशिष्येण शिशुसंज्ञिना ।
श्रीजयन्तीनिर्णयोऽयं लिखितः कृष्णभक्तितः ॥

No. **3118.** जयन्तीनिर्णयः.

JAYANTĪNIRṆAYAḤ.

Substance, palm-leaf. Size, $15\frac{1}{3} \times 1\frac{1}{4}$ inches. Pages, 15. Lines, 6 on a page. Character, grantha. Condition, good. Appearance, old.

Begins on fol. 37*a*. The other work herein is, Vēdārthasaṅgrahaḥ 1*a*.

Similar in character to the above work.

Complete.

Beginning:

भगवन् सर्वलोकेश सर्वलोकपितामह ।
वक्तुमर्हसि मे देव कृष्णजन्मदिनोत्सवम् ॥
ऋक्षं वारं तिथिं लग्नं योगं करणमेव च ।
मासं पक्षं विधिं कालमुपवासं तथार्चनम् ॥
जयन्तीनिर्णयं देव कथयस्व पितामह ।

* * * *

तस्मिन् कालेऽष्टमीयुक्ता रोहिणी कृष्णजन्मभम् ।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ॥

End :

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च मुनिसत्तम ।
अविद्धोपोषणं कार्यं नित्यं विष्णु(परायणैः) ॥

Colophon :

इति ब्रह्मसंहितायां पूर्वभागे ब्रह्मनारदसंवादे जयन्तीनिर्णयः ॥

No. **3119.** जयन्तीनिर्णयः.

JAYANTĪNIRṆAYAḤ.

Substance, palm-leaf (Srītāla). Size, $13\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 30. Lines, 12 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are, Śrīrāmanavamīnirṇayaḥ 16*a*, Śravaṇadvādaśīnirṇaya 17*a*, Ūrdhvapuṇḍramahimā 19*a*.

Similar to the above work.

Beginning :

कृष्णपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥
उपवासादिकार्येषु सप्तम्या(च)युताष्टमी ।
सर्वेषु व्रतकल्पेषु अष्टमी [च] परतश्शुभेति ।
अष्टमी परतश्शुभेति पद्मपुराणेऽपि ।
नाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता ॥
* * * *
श्रुतिस्मृत्युक्तसन्मार्गस्थापको वर्धते भुवि ।
रामानुजस्स भगवान् . . . .

जयन्ती नाम रोहिणी सा च कृत्तिकाकलयाप्यविद्धा ग्राह्या । किमत्र प्रमाणमिति चेत् उच्यते ।

End :

श्रीपाञ्चरात्ररक्षायां पारमेश्वरे क्रियाकाण्डे द्वादशाध्याये—
दशम्येकादशी त्याज्या त्याज्या सप्तमि चा(मगा)ष्टमी ।
कृत्तिकारोहिणी (त्या)न्या(ज्या) त्याज्या पर्वचतुर्दशी ॥
एकादश्याममावास्यां द्वादश्यां कृष्णजम(न्म)नि ।
पश्चाद्भागकलामात्रं कर्माद्यन्तावसानकम् ॥
एकादशीद्वयश्चैव . . तप . . तथा ।
श्रवणार्क्षसंयुक्ता विष्णुजन्मदिनन्तथा ॥

इत्यादीनि बहूनि वचनानि श्रूयन्ते ॥

No. **3120.** तिथिनिर्णयः.

TITHINIRṆAYAḤ.

Substance, paper. Size, $10\frac{1}{8} \times 4\frac{3}{8}$ inches. Pages, 25. Lines, 9 on a page. Character, Dēvanāgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 9*a*. The other work herein is, Kṣētragaṇita 1*a*.

Relates to the various ceremonies to be observed on the different days of all the different lunar months in the year. By Bhaṭṭōjidīkṣita.

Beginning :

अथ चैत्रादिप्रारम्भः ।

अथ चैत्रप्रतिपत् औदयिकी ग्राह्या ; दिनद्वयव्याप्तौ अव्याप्तौ वा पूर्वैव च । चैत्रमासस्य मलमासत्वे तु तत्रैव वत्सरारम्भ इत्येके । शुद्धे वा इत्यपरे । तत्र तैलाभ्यङ्गो नित्यः । अस्यामेव नवरात्रारम्भः तत्र परयुता ग्राह्या तत्रैव प्रपादानमुत्तमम् । अथ चैत्रतृतीया शुक्ला तस्यां डोलाव्रतम् । इयं परा ग्राह्या । इयं मन्वादिः.

End:

व्रते च तीर्थे च यतेः श्राद्धेऽपि च विशेषतः ।
परान्नभोजनाद्देवि यस्यान्नं तस्य तत्फलम् ॥
मीनसङ्क्रान्तौ पूर्वषोडशघटिकाः पुण्याः ॥
इति फाल्गुनमासः ॥
इति द्वादशमासकृत्यानि ॥

Colophon:

इति श्रीभट्टोजिदीक्षितविरचितः संक्षेपतस्तिथिनिर्णयः समाप्तः ॥

No. 3121. तिथिनिर्णयकारिका.

TITHINIRṆAYAKĀRIKĀ.

Substance, palm-leaf. Size, 18½ × 1¼ inches. Pages, 10. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol 59*a*. The other works herein are, Mōkṣakāraṇatāvāda 1*a*, Pratijñāvāda 19*a*, Jñānayāthārthyavāda 34*a*, Drāviḍaprabandhārambhasamarthana 64*a*.

Complete.

A work similar to the above, but more particularly devoted to the determination of the nature and duration of the required lunar days. By Śrīnivāsa of Vaikhānasaśākhā.

Beginning:

जगद्गुरुं नमस्कृत्य कमलागृहमेधिनम् ।
करोमि महतां प्रीत्यै श्राद्धार्हतिथिनिर्णयम् ॥
सौरेण वाथ चान्द्रेण मानेनैकेन केनचित् ।
पूर्वैराचरितेनैव व्रतश्राद्धादिकं चरेत् ॥
कुलाचारानुरोधेन देशधर्माननुव्रजेत् ।
कुलाचारपरित्यागी पङ्किलां गतिमश्नुते ॥
यदा यत्राचरेत् कर्म तत्र तन्निकटेऽपि वा ।
गुणितं यत्तु पञ्चाङ्गं तेन तत्तत्समाचरेत् ॥

देशान्तरैस्तथाक्षांशैः भिन्नास्तिथ्यादिनाडिकाः ।
अतस्स्याद्देशभेदेन तिथ्यादीनां विभिन्नता ॥

End:

उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः ।
पञ्चभागेषु तुर्याङ्गी तिथियोगेन नीयताम् ॥
अधिकं त्वत्र वक्तव्यमन्यत्रैव प्रपञ्चितम् ।
इदन्तु सुखबोधायेत्यास्तां सर्वं समञ्जसम् ॥

Colophon:

इति कौशिकगोत्रेण श्रीगोविन्दार्यसूनुना ।
श्रीवेङ्कटेशपादाब्जसमाराधनकारिणा ॥
तद्दत्तवेदवेदान्तदेशिकाख्येन धीमता ।
सर्वतन्त्रस्वतन्त्रेण गर्भचक्राङ्कजन्मना ॥
श्रीवैखानसनिष्ठेन श्रीनिवासार्ययज्वना ।
रचिता परिपूर्णेयं तिथिनिर्णयकारिका ॥ ९८ ॥
दीक्षितीयं(यः) तिथिनिर्णयं(यः) समाप्तम्(ः)। ।

लक्ष्मीनारायणपुरवासिना रङ्गाचार्यतनूजेन श्रीनिवासराघवाभिधेन विदुषा लिखितं दीक्षितीयमिदम् ॥

No. 3122. तिथिप्रदीपिका.

TITHIPRADĪPIKĀ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 174. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

A work by Nṛsimhasūri regarding the fixing of the lunar days for the performance of various religious rites.

Begins on fol. 1*a*. The other work herein is, Vināyakādidhyāna 89*a*.

Beginning:

(पु)त्रो नृसिंहविबुधः श्रुतधर्मशास्त्रा-
ण्यध्याप्य शिष्यनिवहैः पुनरर्थितस्सन् ।
कालस्य रूपमखिलं तिथिनिर्णयादि
वक्तुं समारभत तन्मनसीष्टसिद्ध्यै ॥
याथार्थ्यादीश्वरः कालः काल एवेश्वरोऽथ वा ।
तस्मादीश्वररूपत्वात् कालो निर्णीयते मया ॥
अनन्ताचार्यवर्येण मन्त्रिणा मङ्गिगल्लुना ।
विद्यारण्ययतीन्द्राद्यैः निर्णीतः कालनिर्णयः ॥
अनिश्शेषीकृतस्तैश्च मम दिष्ट्या कियान् कियान् ।
तमहं स(सु)स्फुटं वक्ष्ये ध्यात्वा गुरुपदाम्बुजम् ॥

* * * *

सूर्यमण्डलात्सकाशादिन्दोः प्रथमकलानिर्गमे प्रतिपद्भवति । द्वितीयाहोरात्रेण द्वितीयकलानिर्गमे द्वितीया भवति । एवमुत्तरास्तिथय उन्नेयाः । एवं कलानिर्गमक्रमेण पञ्चदशाहोरात्रेण पञ्चदश्याः कला(या) निर्गमे पूर्णिमा भवति । ततश्च षोडशाहोरात्रेण इन्दोरेककलाया रविमण्डलप्रवेशे प्रतिपद्भवति ।

End:

दीपावल्यां निशि हिमकर(रे)स्वातियुक्ते तुरीये
यामे त्वायुः श्रियमपि यशः पुत्रलाभं तनोति ।
तैलस्नानं सह हितजलैः कुर्वतामह्नि तावत्
लक्ष्मीहा(नि)चिरु(श्चिर)मपयशः पुत्रशोकं तदेव ॥
युग्मत्रिपदनक्षत्रभानुभौमभृगुष्वपि ।
समारुतर्क्षे तुरीये न दोषाय भवेत् स्मृतम् ॥

युग्मत्रिपादान्वितभानुभौमभृगुन्य(ष्व)पि स्याद्यदि मारुतर्क्षे ।
यस्मिन् दिने व्यापितुरीययामे दीपावली सा निशि सम्प्रशस्ता ॥
स्वात्यर्क्षे(त्यृक्षे) यद्दिने रात्रौ चन्द्रे(न्द्रो) दीपावली भवेत् ।
पूर्वभागं प्रशंसन्ति वसिष्ठात्रिपराशराः ॥
व्यतीपातेऽपि सङ्क्रान्ते इन्दुक्षयदिनेऽपि वा ।
तदा दीपावलीस्नानं नदोषं स्वातिसंयुतम् ॥
पुनःस्नानं न कर्तव्यं सङ्क्रान्तिग्रहणं विना ।
पूर्वमेव प्रशंसन्ति स्नानं नैमित्तिकं विना ॥

Colophon:

इति श्रीमत्प्रतापनृसिंहसूरिविरचितायां तिथिप्रदीपिकायां दीपावलीनिर्णयस्समाप्तः ॥

సర్వజిన్నామసంవత్సర కార్తీక బహుళ ఏకాదశీ మంగళవారంవరకు ప్రతాపగిరివారి ప్రతిజూచి తెలికెపల్లి పురుషోత్తముడు తిథి దీపిక వ్రాసుకొనెను ॥

No. 3123. तिथ्यादिनिर्णयः.

TITHYĀDINIRṆAYAḤ.

Pages, 30. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2968.

Similar in character to the above.

Incomplete.

Beginning:

बा(ब)हवो दर्शिताः काला ये बाल्ये वार्धकेऽपि वा ।
ग्राह्यास्तत्राधिकास्स्वल्पा देशभेदास्तु चाव(प)दि ॥
सितेज्ज्यै(ज्य)योर्वार्धकं च शैशवं च न शोभनम् ।
सर्वकर्मसु यत्नेन वर्जयेद्गार्गि(र्ग्य)सम्मतेः ॥

अनादिदेवतां दृष्ट्वा शुभास्त्युनों(नें)ष्टभार्गवे ।
मलिम्लुचेऽप्यनावृत्तं तीर्थस्नानं . . . . . . ॥

End:

अह्नि सङ्क्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितम् ।
रात्रौ सङ्क्रमणे पुण्यं दिनार्धं स्नानदानयोः ॥

रात्रौ यद्यस्ति चेत् मध्याह्नादुपरि पुण्यकालः स्यात् । याम्यायने विष्णुपदे तदादाविति विशेषण(स)त्वात् । षडशीतिसङ्क्रमणेषु दिवा प्रवेशं (शो)यद्यस्ति चेत् तद्घटिकादा(मा)रभ्य पुण्यकालं(लः) स्यात् । रात्रौ यद्यस्ति चेत् परेद्युरुदयघटिकादा(मा)रभ्य वदन्त्यपरे । षडशीतिवक्त्रेति विशेषण(स)-त्वात् । किञ्च—

षडशीत्यां व्यतीतायां षष्टेरुक्त(ष्टिरुक्तास्तु)नाडिकाः ।
सर्वसङ्क्रमणायनप्रवेशविषये.

No. **3124.** दशनिर्णयः.

DAŚANIRṆAYAḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 216. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

At the beginning there is an index of 18 pages.

This is a work by Vaidikasārvabhauma dealing with the following ten determinations:—

1. Jayantīnirṇayaḥ.
2. Kṛttikādīpanirṇayaḥ.
3. Upākarmanirṇayaḥ
4. Samānapravaranirṇayaḥ.
5. Sthālīpākanirṇayaḥ.
6. Durbhōjanādiprāyaścitta-nirṇayaḥ.
7. Ēkādaśīnirṇayaḥ.
8. Śravaṇadvādaśīnirṇayaḥ.
9. Saṅkrāntinirṇayaḥ.
10. Śrīrāmanavamīnirṇayaḥ.

Beginning:

नमस्ते रमाधीश पुंसे परस्मै विधीशादिदेवार्चिताङ्घ्रे नमस्ते ।
मुकुन्दारविन्दाक्ष विष्णो नमस्ते हृषीकेश मह्यं प्रसीद प्रसीद ॥

दशाख्यनिर्णि(र्णी)र्देशनिर्णयीतिख्यातानुबन्धस्स्मृतिसन्निबन्धः ।
स वैदिकैर्वैदिकसार्वभौमः सङ्गृह्यतां वैदिकसार्वभौमः ॥ १ ॥

निर्मत्सरोऽस्तीति कृतिः कृता(सौ) सो(से)यं न चेत्स्वार्थमिहास्तु सा मे ।
भुङ्क्ते स्वयं हि स्वकृतं ततस्तन्निन्दन्तु नन्दन्तु भजन्तु वान्ये ॥ २ ॥

फल्गूनि वल्गूनि बुधोऽपि विन्दते यथा हि पाथांसि पयांसि हंसकाः ।
कृतिं बुधाः पश्यत मे किमन्यैः किं वेत्त्यहो काचवणिङ्मणीन्द्रम् ॥ ३ ॥

इह तावज्जयन्तीनिर्णयः क्रियते ।

सर्वत्र निर्णये शास्त्रमेव प्रमाणं न युक्तयः । यद्गाधि(यि)—

तस्माच्छास्त्रं प्रमाणन्ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हति(सि) ॥

ननु श्रीधरीयज्यौतिषार्णवकालनिर्णयादिषु तन्निर्णीयते ; किमर्थमय-मिति चेन्नैवम्—

तेषु साकल्येनानुक्तेः । उक्तं हि कालनिर्णय इति चेत्तदपि न चतुर-मिव दृश्यते । तथाहि—

End:

जयन्त्यामेव कृष्णस्य पारणा विहिता निशि ।
इतरासु जयन्तीषु परेद्युः पारणं स्मृतम् ॥ इति ।

अनेन वचनेन तद्वचनं सत्प्रतिपक्षितम् । सतु(तत्तु) रागमूलमित्युपेक्ष-णीयम् । तस्मात्पूर्वोक्तमेव निरवद्यमिति सर्वं समञ्जसम् ॥

Colophon:

इति श्रीरामनवमीनिर्णयस्समाप्तः ॥

No. **3125.** दशानिर्णयः.

DAŚANIRṆAYAḤ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 218. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

Colophon:

इति हारीतकुलतिलकस्य सरस्वतीवल्लभपौत्रस्य श्रीरङ्गनाथसूनोः वैदिकसार्वभौमापरनामधेयस्य श्रीवेङ्कटनाथनामधेयस्य कृतिषु दशनिर्णय्यामेकादशीनिर्णयस्समाप्तः ॥

No. **3126.** दशानिर्णयः.

DAŚANIRṆAYAḤ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 96. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

Breaks off in Samānapravaranirṇaya. Durbōjanaprāyaścittanirṇaya and Srīrāmanavamīnirṇaya are wanting.

No. **3127.** दर्शनिर्णयः.

DARŚANIRṆAYAḤ.

Pages, 27. Lines, 7 on a page.

Begins on fol. 112*a* of the MS. described under No. 2938.

Regarding the determination of the new-moon-day fo rceremonial purposes.

Beginning:

जयति विमलकीर्तिर्वीतभुक्चक्रवर्ती
क्षितिधरमणिवर्ती श्रीशघण्टांशमूर्तिः ।

हृदयकमलवर्ती श्रीहयग्रीवमूर्ति-
र्विदळितविनतार्तिस्सर्वतन्त्रस्वतन्त्रः ॥

ग्रन्थाननेकाननवेक्ष्य किञ्चित्पाण्डित्यमात्रेण विदग्धमानिभिः ।
उक्तार्थवर्गस्फुटदोषवर्गान् विद्वन्मणीनामुपदर्शयामः ॥

यत्तावदुक्तं दर्शे स्नात्वा पितृभ्यस्त्वित्यादिभिर्विहितं दर्शश्राद्धमिति तदिदं स्थवीयः । अहरहस्सन्ध्यामुपासीतेत्यादिभिर्विहितस्य सन्ध्योपासनस्य,

"सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥
सायम्प्रातस्तु वै सन्ध्यां ये विप्रा नो उपासते ।
कामं तान् धार्मिको राजा शूद्रकर्मसु योजयेत् ॥"

इति वचनयोरिव, प्रमीतपितृकः कुर्याद्दर्शाब्दिकमहालयान् इत्यादिभिर्विहितस्य दर्शश्राद्धस्य करणाकरणयोरभ्युदयप्रत्यवायबोधकयोर्यच्छब्दप्रतिबद्धविधिशक्तिकयोरुपात्तवचनयोर्विधायकत्वाभावेन तद्विहितत्वोक्तेः मीमांसाशास्त्रसिद्धान्ततत्त्वानभिज्ञतानिबन्धनत्वात् ।

End:

सूत्रेष्वनारभ्यवादरूपाङ्गविधीनां नित्यतर्पणविकृतित्वं प्रतिनिधितर्पणस्य दुरपह्नवमेवेति सिद्धेः ।

मदीयहृदये दयारसजलाशयस्वाश्रम-
स्त्रयीशिखरदेशिकः कलितसान्निधिस्सान्निधिः ।
स्वरूपमुदभावयन्विनतशर्मणे कर्मणां
मनागपि विनामुना भजति सत्पथं कः कथम् ॥

प्रमाणशरणाः केचित्सन्त्यद्यापि क्वचित्क्वचित् ।
तेषामेष (कृते धर्मे) शास्त्रमार्गः प्रकाशितः ॥

No. 3128. निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 636. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

A manual of Dharmaśāstra by Kamlākarabhaṭṭa, son of Rāmakṛṣṇabhaṭṭa, grandson of Nārāyaṅabhaṭṭa, brother of Divākarabhaṭṭa, great grandson of Rāmēśvarasūri and pupil of Nārāyaṇēndrasvāmin.

The work is divided into 3 Paricchēdas :—1. Paribhāṣā and Thithinirṇaya, dealing with the required technological terms and the determination of the several days of the Pakṣa; 2. Saṁvatsarakṛtyanirūpaṇam, being a calendar of religious fasts and feasts; 3. Prakīrṇanirṇaya, which deals with miscellaneous topics and is sub-divided into 3 Prakaraṇas, namely, Saṁskāra, Śrāddha and Āśauca. *Vide* page 496 of the I. O. L. C.

Said to have been copied from the book of one Madura Subbanna, for the use of a Gōvinda Naicker.

Beginning :

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥

कारुण्यैकनिकेतं रामं सीतालतायुक्तम् ।
विश्वामित्रान्ववाय(तावितान)व्रततिसमालम्बशाखिनं वन्दे ॥

लक्ष्मीसहायं कल्पद्रुतलक(र)ञ्जितगोकुलम् ।
बर्हापीडं घनश्यामं महः किञ्चिदुपास्महे ॥

वेदार्थधर्मरक्षायै मायामानुषविग्रहम् ।
पितामहमहं वन्दे भट्टनारायणाह्वयम् ॥

यत्पादसंस्मृतिस्सर्वा(र्व)मङ्गळप्रंतिभूर्मता ।
तान्भट्टरामकृष्णाख्यान् श्रीतातचरणान्नुमः ॥

सर्वकल्याणसन्दोहनिदानं यत्पदद्वयम् ।
द्युनदीसोदरीमम्बामुमाख्यां नौमि सादरम् ॥

बिन्दुमाधवपादाम्बुका(ब्जरो)लम्बीकृतविग्रहम् ।
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥

हेमाद्रिमाधवमते प्रविचार्य सम्यगालोच्य तत्त्वमद(थ)तीर्थकृतां परेषाम् ।
श्रीरामकृष्णतनयः कमलाकराख्यः काले यथामति विनिर्णयमातनोति ॥

सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ।
तथाप्यमुष्य वैदग्धीं केचिद्विज्ञातुमीशते ॥

तत्र सङ्क्षेपतः कालः षोढा—अब्दोऽयनमृतुर्मासः पक्षो दिवस इति । तत्राब्दो माधवमते पञ्चधा—सावनस्सौरश्चान्द्रो नाक्षत्रो बार्हस्पत्य इति । गुरोर्मध्यमराशिभोगेन बार्हस्पत्यः । स च ज्योतिश्शास्त्रे प्रसिद्धः ।

End :

एकादशेऽह्नि पार्वणम् । हंसपरमहंसादीनां पार्वणाब्दिकादिकमपि न कार्यमिति शूलपाणिः । द्वादशे नारायणबलिः । तद्विधिरन्यश्च विशेषः प्रागुक्त इत्यलं बहुना ।

एवं निरूपितमिदं गहनं तु धर्मतत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेश(च)नीयं विद्वद्भिरित्यावेरतं प्रणतोऽस्मि तेषु ॥

मया सद्वासद्वा यदिह गदितं मन्दमतिना
किमेतच्छक्यं वाध्यवसितुमपि स्वल्पमतिना ।

तदेवं यत्किञ्चिद्गदितमिह विख्यातमहिमा
प्रतापोऽयं सर्वो विकसति तु पित्रोश्चरणयोः ॥

यो भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।
योऽत्र श्रमः कु(कि)ल कृतः कमलाकरेण
पित्रोस्तु तेन सु(प्रीतोऽमुनास्तु स)कृती बुधरामकृष्णः ॥

श्रीभट्टरामेश्वरसूरिसूनुता(श्री)भट्टनारायणसूरिसूनोः ।
श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबन्धं कमलाकराख्यः ॥
नानानिर्णय(दत्वान्निर्णय)सिन्धुः प्रोच्य(प्रकट्य)तां विबुधाः ।
निर्णयसरोज[चे]य(व)त्त्वान्निर्णयकमलाकरोऽप्यस्तु ॥

Colophon:

श्रीरामकृष्णभट्टात्मजादिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ तृतीयः परिच्छेदः ॥

समाप्तश्चायं निबन्धः ॥

श्रीमन्नारायणेन्द्राख्यस्वामिशिष्यश्च भक्तिमान् ।
रामचन्द्रपदाम्भोजे दुल्लराघवपण्डितः ॥
तस्य पुत्रेण विदुषा नाम्ना वेङ्कटमन्त्रिणा ।
लिखितं पुस्तकं धर्मनिर्णयानां महोदधेः ॥
शुभकृद्वत्सरे चैव मेषराश्यां रवौ स्थिते ।
वैशाखे शुक्लपक्षे तु चतुर्दश्यां भृगोर्दिने ॥
एतत्सर्वं महद्ग्रन्थं यथावल्लिखितं मया ।
तत्सर्वं क्षम्यतां देवश्श्रीमन्नारायणो हरिः ॥

No. 3129. निर्णयसिन्धुः.

NIRṆAYASĪNDHUḤ.

Pages, 326. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3019.

The 3rd Paricchēda complete.

Same work as the above.

प्रमाथ्यब्दे ज्येष्ठमासे दशम्यामिन्दुवासरे ।
लिखितं(तः) पद्मनाभेन मुदा निर्णयसागरः ॥

No. 3130. निर्णयसिन्धुः.

NIRṆAYASINDHUḤ.

